346sk13

१३

भ्वादिप्रकरणे- भूधातोः लटि रूपसाधनम् -२

उपक्रमः -

भूधातोः भवति इति रूपसाधनमेवानुवर्तते। अतः पृथक् प्रस्तावना उद्देश्यानि वा न दत्तम्।

[१३.१] तिङ् शित् सार्वधातुकम्॥ (३.४.११३)

सूत्रार्थः - धात्वधिकारोक्तः तिङ् शित् च सार्वधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - संज्ञासूत्रमिदम्। अनेन सार्वधातुकसंज्ञा विधीयते। अस्मिन् त्रीणि पदानि सन्ति। तिङ् (१/१), शकारः इत् यस्य स शित् (१/१), सार्वधातुकम् (१/१) इति संज्ञापरपदम्। तिङ् इति प्रत्याहारः। तस्मिन् तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति एते अष्टादश प्रत्ययाः सन्ति। धातोः इति पञ्चम्यन्तम् पदम् अधिकृतम्। पदयोजना - धातोः तिङ् शित् सार्वधातुकम्। सूत्रार्थो भवति - धातोः इति अधिकारे विहितः तिङ् शित् च सार्वधातुकसंज्ञः भवति। अर्थात् धात्वधिकरोक्तः तिङ् शिच्च सार्वधातुकसंज्ञकः भवति।

उदाहरणम् - तिप् तस् झि इत्यादयः तिङः। शप् श्यन् इत्यादयः शितः।

[१३.२] आर्धधातुकं शेषः॥ (३.४.११४)

सूत्रार्थः - धातोरिति विहितः तिङ्शिद्भ्योऽन्यः प्रत्ययः आर्धधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - सूत्रमिदं संज्ञासूत्रम्। अनेन आर्धधातुकसंज्ञा विधीयते। अस्मिन् द्वे पदे स्तः। आर्धधातुकम् शेषः इति सूत्रगतपदच्छेदः। धातोः इति पञ्चम्येकवचनान्तं पदम् अधिकृतम् अस्ति। धातोरेकाचो हलादेः क्रियासमभिहारे यङ् इति सूत्रादपि धातोः इति पञ्चम्यन्तं पदमनुवर्तते। पदयोजना - धातोः धातोः शेषः आर्धधातुकम्। शेषः इत्यस्य तिङ्-शिद्भ्यः अन्यः इत्यर्थः। तेन सूत्रार्थश्च भवति - धातोरिति धातोर्विहितः तिङ्शिद्भ्यः अन्यः प्रत्ययः आर्धधातुकसंज्ञः स्यात् इति। अर्थात् धातोः इति अधिकृत्य धातुतः विहितः यः तिङ्भिन्नः शिद्भिन्नः च प्रत्ययः तस्य आर्धधातुकसंज्ञा अनेन सूत्रेण भवति।

गुप्तिज्किद्भ्यः सन् इति सूत्रेण धातुतः सन् प्रत्ययः विहितः। किन्तु धातोः इति उक्त्वा अर्थात् धात्वधिकारे न विहितः। अतः अस्य आर्धधातुकसंज्ञा न भवति।

उदाहरणम् - च्लि सिच् स्य तास् क्त क्तवतु इत्यादयः।

[१३.३] लिट् च॥ (३.४.११५)

सूत्रार्थः - लिडादेशः तिङ् आर्धधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - शक्तिग्राहकत्वात् सूत्रमिदं संज्ञाकोटौ अन्तर्याति। द्विपदात्मकेऽस्मिन् सूत्रे लिट् इति लुप्तषष्ठीकं पदम्। अतः लिटः इति लभ्यते। च इति अव्ययपदम्। तिङ् शित् सार्वधातुकम् इति सूत्रात् तिङ् इति प्रथमैकवचनान्तं संज्ञिबोधकं पदमनुवर्तते। तथा आर्धधातुकं शेषः इति सूत्रात् संज्ञासमर्पकं प्रथमान्तं पदमनुवर्तते। लङः शाकटायनस्यैव इति सूत्रात् एव इत्यव्ययपदम् अनुवर्तते। एवं लिटः तिङ् आर्धधातुकम् एव इति सूत्रगतपदान्वयः। तेन सूत्रार्थः भवति - लिटः स्थाने विहितः तिङ् आर्धधातुकसंज्ञः एव स्यात्। अत्र एवकारेण सार्वधातुकसंज्ञा व्यावृत्यते। अतः लिटः स्थाने विहितस्य तिङः सार्वधातुकसंज्ञा न भवति।

[१३.४] लिङाशिषि॥ (३.४.११६)

सूत्रार्थः - आशिषि लिङादेशः तिङ् आर्धधातुकसंज्ञः स्यात्।

सूत्रव्याख्या - संज्ञासूत्रमिदम्। अनेन आर्धधातुकसंज्ञा विधीयते। अस्मिन् द्वे पदे स्तः। लिङ् इति लुप्तषष्ठीकं पदम्। तेन लिङः इति लभ्यते। आशिषि (७/१)। तिङ् शित् सार्वधातुकम् इति सूत्रात् तिङ् इति प्रथमान्तं संज्ञिपरं पदमनुवर्तते। आर्धधातुकं शेषः इति सूत्रात् संज्ञासमर्पकम् आर्धधातुकमिति प्रथमान्तं पदमनुवर्तते। लङः शाकटायनस्यैव इति सूत्रात् एव इत्यव्ययपदम् अनुवर्तते। पदयोजना - आशिषि लिङः तिङ् आर्धधातुकम् एव। सूत्रार्थो भवति - आशीर्वादार्थे विहितस्य लिङः स्थाने यः तिङ् तस्य आर्धधातुकसंज्ञा एव भवति। अत्र एवकारेण सार्वधातुकसंज्ञा व्यावृत्यते। अतः लिटः स्थाने विहितस्य तिङः सार्वधातुकसंज्ञा न भवति।

अयमत्र सारः

धातुतः लकाराः विधीयन्ते। कोऽपि लकारः तिङ् नास्ति शित् वा नास्ति। अतः सर्वे लकाराः आर्धधातुकसंज्ञकाः। लकाराणां स्थाने तिङ् विधीयते। अयं तिङ् सार्वधातुकसंज्ञकः भवति। परन्तु लिटः स्थाने विहितः तिङ् एवञ्च आशीर्वादार्थे विहितस्य लिङः स्थाने विहितः तिङ् आर्धधातुकसंज्ञकः भवति। यस्य लकारस्य आदेशः तिङ् सार्वधातुकसंज्ञकः स लकारः सार्वधातुकलकारः इति केचित् वदन्ति। परन्तु लकारः न कदापि सार्वधातुकसंज्ञकः।

लुटि लृटि लुङि लृङि च धातु-लकारयोः मध्ये तास् स्य च्लि स्य एते विधीयन्ते। ते धातोः विहिताः तिङ्भिन्नाः, शिद्भिन्नाः च सन्ति। अतः आर्धधातुकसंज्ञकाः सन्ति। परन्तु तेषां लकराणां स्थाने विहितः तिङ् सार्वधातुकसंज्ञक एव अस्ति। तथापि लुट् लृट् लुङ् लृङ् चेति आर्धधातुकलकाराः इति प्रचारः।

भू ति इति स्थिते तिप् तिङ् अस्ति, धातोः विहितः अस्ति। अतः तिङ्शित् सार्वधातुकम् इति सूत्रेण तिपः सार्वधातुकसंज्ञा भवति। मूलतः वर्तमाने लट् इत्यत्र स्पष्टीकृतं यत् लट् कर्तरि अर्थात् कर्त्रर्थे विहितः अस्ति। तदा - (अग्रिमसूत्रे द्रष्टव्यम्)

पाठगतप्रश्नाः-५

३३. सार्वधातुकसंज्ञा कस्य।

३४. आर्धधातुकसंज्ञा केषाम्।

३५. आर्धधातुकं शेषः इत्यत्र कः शेषः।

३६. के लकाराः सार्वधातुकसंज्ञकाः। उत्तरं समर्थयत।

३७. केषां लकाराणाम् आदेशः तिङ् आर्धधातुकसंज्ञकः।

३८. लिडादेशः तिङ् सार्वधातुकमार्धधातुकं वा।

३९. केषां लकाराणां विकरणानि आर्धधातुकानि। कानि च तानि।

[१३.५] कर्तरि शप्॥ (३.१.६८)

सूत्रार्थः - कर्त्रर्थे सार्वधातुके परे धातोः शप् भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु 'कर्तरि शप्' इति विधिसूत्रम्। अनेन शप् विधीयते। सूत्रेऽस्मिन् पदद्वयं वर्तते। तत्र कर्तरि इति सप्तम्येकवचनान्तं पदम्, शप् इति च प्रथमैकवचनान्तं पदम्। 'सार्वधातुके यक्' इति सूत्रात् सार्वधातुके इति पदमनुवृत्तम्। 'धातोरेकाचो हलादेः क्रियासमभिव्याहारे यङ्' इति सूत्रात् धातोरिति पदम् अनुवर्तते। 'प्रत्ययः' इति 'परश्च' इति सूत्रद्वयमपि अत्र अधिकृतम्। पदयोजना - कर्तरि सार्वधातुके धातोः शप् प्रत्ययः परः इति। सूत्रार्थो भवति - कर्त्रर्थे सार्वधातुके प्रत्यये परे धातोः परः शप् प्रत्ययः स्यादिति। तिङ्प्रत्यये परे सति धातोः ये शबादयः प्रत्यया विधीयन्ते तेषां विकरणसंज्ञा भवतीति प्राचीनाचार्याणां मतम्। अतः शप् इति विकरणम्।

उदाहरणम् - भवति।

सूत्रार्थसमन्वयः - भूधातोः विवक्षातः कर्त्रर्थे लट् अस्ति। लटः स्थाने तिप् विहितः। तदा भू ति इति स्थितिः जाता। अत्र भूधातोः परं तिप् तिङ्शित्सार्वधातुकम्' इत्यनेन सार्वधातुकसंज्ञकः। भूधातोः परं कर्त्रर्थे सार्वधातुकम् अस्ति। अतः कर्तरि शप् इति सूत्रेण धातोः शप्प्रत्यये शप्प्रत्ययस्थितस्य शकारस्य 'लशक्वतद्धिते' इति सूत्रेण तथा पकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा भवति। इत्संज्ञायां सत्यां 'तस्य लोपः' इति सूत्रेण उभयोः शकारपकारयोः लोपो भवति। तदा भू अ ति इति स्थितिः जायते। तदा -

[१३.६] सार्वधातुकार्धधातुकयोः॥ (७.३.८४)

सूत्रार्थः - सार्वधातुकार्धधातुकयोः परयोरिगन्ताङ्गस्य गुणः स्यात्।

सूत्रव्याख्या - सूत्रमिदं विधिसूत्रम्। अनेन सूत्रेण गुणः विधीयते। अस्मिन् सूत्रे सार्वधातुकार्धधातुकयोः इति सप्तमीद्विवचनान्तम् पदम्। मिदेर्गुणः इत्यस्मात् सूत्रात् गुणः इति प्रथमान्तं पदमनुवर्तते। अङ्गस्य इति अधिकृतमस्ति। अस्मिन् सूत्रे कस्य स्थाने गुणः भविष्यति इति स्थानी साक्षात् नोक्तः। किञ्च गुणः इति विधेयपरं गुणपदम् उच्चार्य गुणः विधीयते। अतः इको गुणवृद्धी इति परिभाषया इकः इति षष्ठ्यन्तं पदमत्रोपस्थाप्यते। इदं सूत्रम् अङ्गाधिकारे पठितम्। अङ्गसंज्ञा प्रत्यये परे सति एव फलति। अतः प्रत्यये इति पदमाक्षिप्यते। तत्रापि सार्वधातुकार्धधातुकयोः इति सप्तमीद्विवचनम्। एतौ अपि प्रत्ययौ एव। अतः प्रत्यये इत्यस्य प्रत्यययोः इति सप्तमीद्विवचनं गृह्यते। तदा पदयोजना भवति - इकः अङ्गस्य गुणः सार्वधातुकार्धधातुकयोः प्रत्यययोः इति।

अत्र इकः अङ्गस्य चेति समानविभक्तिकं पदद्वयम् अस्ति। अङ्गस्य इति पदं विशेष्यम् अस्ति, इकः इति पदम् तस्य विशेषणम् अस्ति। अतः येन विधिस्तदन्तस्य इत्यनेन तदन्तविधिना इगन्ताङ्गस्य इत्यर्थः लभ्यते। इगन्ताङ्गस्य इत्यत्र अल्समुदायबोधकात् स्थानषष्ठी श्रूयते। एवञ्च आदेशः गुणः एकाल् अस्ति। अतः अलोऽन्त्यस्य इति परिभाषया इगन्ताङ्गस्य अन्त्यस्य इकः गुणः भवति। ततश्च सूत्रार्थो भवति –सार्वधातुके आर्धधातुके च प्रत्यये परे इगन्ताङ्गस्य अन्त्यस्य अलः स्थाने गुणः स्यात् इति। इगन्ताङ्गस्य अन्त्यः अल् इक् एव। अतः इकः स्थाने एव गुणो भवति।

उदाहरणम् - भू-धातोः लटि तिपि शपि भू अ ति इति स्थितिः निरूपिता पूर्वसूत्रेषु। शप् धातोः इति विहितः शित् प्रत्ययः। अतः तिङ् शित् सार्वधातुकम् इत्यनेन सार्वधातुकसंज्ञां लभते। अस्मिन् परे भू इत्यस्य अङ्गसंज्ञा भवति। भू इति इगन्तम् अङ्गमस्ति। अतः सार्वधातुकार्धधातुकयोः इति प्रकृतसूत्रेण इगन्ताङ्गस्य भू इत्यस्य अन्त्यस्य इकः ऊकारस्य गुणः प्रसक्तः। ऊकारस्य स्थाने स्थानेऽन्तरतमः इति परिभाषाबलेन स्थानकृदान्तर्याद् ओकारे भो अ ति इति स्थितिः भवति। अत्र ओकाराद् अचि परतः एचोऽयवायावः इत्यनेन ओकारस्य अवादेशे भ् अव् अ ति इति स्थिते सर्ववर्णमेलनेन '**भवति**' इति रूपं सिद्धं भवति।

भवतः - भूधातोः वर्तमानक्रियावृत्तित्वविवक्षायां वर्तमाने लट् इति सूत्रेण कर्तरि लट् विधीयते। लटः अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने प्रथमपुरुषद्विवचनविवक्षायां तस्प्रत्यये भू तस् इति भवति। ततः तिङ्शित्सार्वधातुकम् इति सूत्रेण तसः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ तस् इति जायते। शप्प्रत्ययः शित् एवञ्च धात्वधिकारोक्तः। अतः तिङ्शित् सार्वधातुकमिति तस्य सार्वधातुकसंज्ञा भवति। अतः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ तस् इति जायते। यथासंख्यमनुदेशः समानाम् इति परिभाषया परिष्कृतेन एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ तस् इति जायते। ततः भवतस् इति समुदायस्य सुप्तिङन्तं पदम् इति सूत्रेण तिङन्तत्वेन पदसंज्ञायाम्, अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन ससजुषो रुः इत्यनेन पदान्तसकारस्य रुत्वेऽनुबन्धलोपे भवतर्

इति जायते। अत्र रेफोच्चारणात् परं वर्णान्तरोच्चारणाभावेन तदभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञायाम्, अवसाने परे अलोऽन्त्यस्य इति परिभाषया परिष्कृतेन खरवसानयोर्विसर्जनीयः इत्यनेन पदान्तस्य रेफस्य विसर्गे वर्णसम्मेलने भवतः इति रूपं सिद्ध्यति।

भवन्ति - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने प्रथमपुरुषबहुवचन-विवक्षायां झिप्रत्यये भू झि इति स्थितिः भवति। तदा -

[१३.७] झोऽन्तः॥ (७.१.३)

सूत्रार्थः - प्रत्ययावयवस्य झकारस्य स्थाने अन्त् इत्यादेशः स्यात्।

सूत्रव्याख्या - साक्षाल्लक्ष्यसंस्कारानुरोधादिदं विधिसूत्रम्। सूत्रे द्वे पदे स्तः। झः अन्तः इति सूत्रगतपदच्छेदः। झः इति षष्ठ्येकवचनान्तम् उद्देश्यबोधकं पदम्। इयं च स्थानषष्ठी। अन्तः इति प्रथमैकवचनान्तं विधेयबोधकं पदम्। आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (७.१.२) इति पूर्वसूत्रात् प्रत्ययादिपदस्य एकदेशः प्रत्ययः इति अनुवर्तते, षष्ठ्यन्ततया च विपरिणमते। तेन प्रत्ययस्य इति भवति। अत्र च अवयवावयविभावसम्बन्धे षष्ठी। तेन प्रत्ययावयवस्य झकारस्य स्थाने इति अर्थ आयाति। प्रत्ययस्य झस्य अन्तः इति सूत्रगतपदान्वयः। तेन प्रत्ययावयवस्य झकारस्य स्थाने अन्तादेशो भवतीति सूत्रस्यार्थः भवति। अत्र अन्त् इत्यादेशः तकारान्तः, न तु अकारान्तः। अकारोऽत्र उच्चारणार्थः।

उदाहरणम् - भवन्ति।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण भू झि इत्यवस्थायां प्रकृतसूत्रेण प्रत्ययावयवस्य झि इत्यस्य झकारस्य स्थाने अन्त् इत्यादेशः भवति।

अतः प्रकृतसूत्रेण अन्त् इति आदेशे भू अन्त् इ इति जायते। तत्र तिङ्शित्सार्वधातुकम् इति सूत्रेण अन्ति इति समुदायस्य सार्वधातुकसंज्ञा भवति। झिप्रत्ययः कर्तरि विहितः अस्ति। अतः कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ अन्ति इति जायते। शपोऽपि तिङ्शित् सार्वधातुकमिति सूत्रेण सार्वधातुकसंज्ञा भवति। ततः सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ अन्ति इति जाते एचोऽयवायावः इति सूत्रेण ओकारस्य अवादेशे भव् अ अन्ति इति स्थितिर्भवति। तत्र च अकारात् परम् गुणः अकारः अस्ति। अतः अतो गुणे इति सूत्रेण अकाराकारयोः पररूपैकादेशे भव् अन्ति इति जाते वर्णसम्मेलने **भवन्ति** इति रूपं सिद्ध्यति।

भवसि - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि लस्य मध्यमपुरुषैक-वचनविवक्षायां सिपि अनुबन्धलोपे भू सि इति स्थितिर्भवति। ततश्च तिङ्शित्सार्वधातुकम् इति सूत्रेण सिपः सार्वधातुकसंज्ञायां कर्तरि विहितत्वाच्च कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ सि इति जायते। शपोऽपि तिङ्शित् सार्वधातुकमिति सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ सि इति जाते एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ सि इति जाते वर्णसम्मेलने **भवसि** इति रूपं सिद्ध्यति।

भवथः - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि लस्य स्थाने मध्यमपुरुषद्विवचनविवक्षायां थस्-प्रत्यये भू थस् इति स्थितिर्भवति। तिङ्शित्सार्वधातुकम् इति सूत्रेण थसः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ थस् इति जाते, शपोऽपि सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ थस् इति जाते एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ थस् इति जाते रुत्वे विसर्गे च कृते भव् अ थः इति स्थिते वर्णसम्मेलने **भवथः** इति रूपं सिद्ध्यति।

भवथ - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि लस्य स्थाने मध्यमपुरुषबहुवचनविवक्षायां थ-प्रत्यये भू थ इति स्थितिर्भवति। तिङ्शित्सार्वधातुकम् इति सूत्रेण थस्य सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ थ इति जाते, शपोऽपि सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे भो अ थ इति जाते एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ थ इति जाते वर्णसम्मेलने **भवथ** इति रूपं सिद्ध्यति।

भवामि - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि अनुबन्धलोपे भू ल् इति जाते लस्य स्थाने उत्तमपुरुषैकवचनविवक्षायां मिपि अनुबन्धलोपे भू मि इति स्थितिर्भवति। तिङ्शित्सार्वधातुकम् इति सूत्रेण मिपः सार्वधातुकसंज्ञायां कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ मि इति जाते, शपोऽपि शित्त्वात् सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे ओकारे भो अ मि इति जाते एचोऽयवायावः इति सूत्रेण अवादेशे भव् अ मि इति जायते। तदा -

[१३.८] अतो दीर्घो यञि॥ (७.३.१०१)

सूत्रार्थः - अदन्तस्य अङ्गस्य स्थाने दीर्घः स्यात् यञादौ सार्वधातुके परे।

सूत्रव्याख्या - षड्विधपाणिनीयसूत्रेषु साक्षाल्लक्ष्यसंस्कारत्वाद् विधिकोटौ इदं सूत्रम् अन्तर्याति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। अतः दीर्घः यञि इति सूत्रस्थपदच्छेदः। तेषु अतः इति षष्ठ्येकवचनान्तं पदम्। दीर्घः इति प्रथमान्तं विधेयबोधकं पदम्। यञि इति सप्तम्यन्तं पदम्। सूत्रमिदम् अङ्गस्य इत्यधिकारे वर्तते। 'अतः' इति पदम् अङ्गस्य इति षष्ठ्यन्तपदस्य विशेषणम्। अतः येन विधिस्तदन्तस्य इति तदन्तविधिना अदन्तस्य अङ्गस्य इत्यर्थो भवति। तुरुस्तुशम्यमः सार्वधातुके इति सूत्रात् सार्वधातुके इति सप्तम्यन्तं पदमनुवर्तते। इदं च विशेष्यबोधकं पदम्। यञि इति सप्तम्यन्तम् अल्बोधकं विशेषणम्। ततश्च यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया तदादिविधिना यञादौ सार्वधातुके इत्यर्थो भवति। एवमाहत्य अदन्ताङ्गस्य दीर्घः यञि सार्वधातुके इति सूत्रस्थपदानामन्वयः। अदन्ताङ्गस्य इत्यत्र अल्समुदायबोधकात् स्थानषष्ठी श्रूयते। अतः अलोऽन्त्यस्य इति परिभाषया अदन्ताङ्गस्य अन्त्यस्य अलः एव आदेशः स्यात्। तेन सूत्रार्थः भवति - अदन्ताङ्गस्य अन्त्यस्य अलः स्थाने दीर्घो भवति यञादौ सार्वधातुके परे इति।

उदाहरणम् - भवामि।

सूत्रार्थसमन्वयः - भव् अ मि इत्यवस्थायां मिप्प्रत्ययपरतः पूर्वस्य भव् अ इति समुदायस्य अङ्गसंज्ञा अस्ति। मिप्प्रत्ययः सार्वधातुकसंज्ञकः यञादिः च अस्ति। किञ्च इदम् अङ्गम् अदन्तम् अस्ति। अतोऽत्र प्रकृतसूत्रेण अन्त्याकारस्य स्थाने दीर्घो भवति। तदा भवा मि इति जाते वर्णसम्मेलने **भवामि** इति रूपं सिद्ध्यति।

भवावः - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि अनुबन्धलोपे भू ल् इति स्थिते लस्य स्थाने उत्तमपुरुषद्विवचनविवक्षायां वसि भू वस् इति स्थितिर्जायते। ततः तिङ्शित्सार्वधातुकम् इति सूत्रेण वसः सार्वधातुकसंज्ञायां तस्मिन् परतः कर्तरि शप् इति सूत्रेण धातोः शपि अनुबन्धलोपे भू अ वस् इति जाते, शपोऽपि सार्वधातुकत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे स्थानत आन्तर्याद् ओकारे, एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ वस् इति स्थितिः उद्भवति। तत्र वसि परे विकरणविशिष्टस्य भव इत्यस्य अङ्गसंज्ञा भवति। वस् यञादिः सार्वधातुकः च। अतः अतो दीर्घो यञि इति सूत्रेण अदन्ताङ्गस्य भव इत्यस्य वकारोत्तरस्य अकारस्य दीर्घो भवति। तदा भवा वस् इति जायते। भवावस् इति समुदायः तिङन्तः। अतः तस्य सुप्तिङन्तं पदम् इति सूत्रेण पदसंज्ञा भवति। तेन ससजुषो रुः इत्यनेन पदान्तसकारस्य रुत्वेऽनुबन्धलोपे खरवसानयोर्विसर्जनीयः इत्यनेन रेफस्य विसर्गे वर्णसम्मेलने भवावः इति रूपं सिद्ध्यति।

भवामः - भूधातोः वर्तमाने लट् इति सूत्रेण कर्तरि लटि, लस्य स्थाने उत्तमपुरुषद्विवचनविवक्षायां मसि, तिङ्शित्सार्वधातुकम् इति सूत्रेण मसः सार्वधातुकसंज्ञायां तस्मिन्परतः कर्तरि शप् इति सूत्रेण धातोः शपि, शपोऽपि सार्वधातुकत्वेन तस्मिन्परे सार्वधातुकार्धधातुकयोः इति सूत्रेण इगन्ताङ्गस्य भुवः ऊकारस्य गुणे ओकारे, एचोऽयवायावः इति सूत्रेण अच्परत्वाद् ओकारस्य अवादेशे भव् अ मस् इति जाते मसः यञादित्वेन सार्वधातुकत्वेन च तस्मिन् परे विकरणविशिष्टस्य भव इत्यस्य अङ्गत्वविज्ञानात् अतो दीर्घो यञि इति सूत्रेण अदन्ताङ्गस्य भव इत्यस्य मकारोत्तरस्य अकारस्य दीर्घे भवा मस् इति जाते समुदायस्य तिङन्तत्वेन पदसंज्ञायाम्, ससजुषो रुः इत्यनेन पदान्तसकारस्य रुत्वेऽनुबन्धलोपे खरवसानयोर्विसर्जनीयः इत्यनेन रेफस्य विसर्गे वर्णसम्मेलने भवावः इति रूपं सिद्ध्यति।

भूधातोः लटि रूपाणि --

लट्	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	भवति	भवतः	भवन्ति
मध्यमपुरुषः	भवसि	भवथः	भवथ
उत्तमपुरुषः	भवामि	भवावः	भवामः

पाठगतप्रश्नाः-६

४०. शप् कदा विधीयते।

४१. भू अ ति इति स्थिते भुवः ऊकारस्य गुणः केन सूत्रेण।

४२. झोऽन्तः इति सूत्रस्यार्थं लिखत।

४३. भूधातोः लटि सिपि किं रूपम्।

[१३.९] धात्वादेः षः सः॥ (६.१.६२)

सूत्रार्थः - धात्वादेः षस्य सः स्यात्।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण सकारः विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। धात्वादेः (६/१), षः (६/१), सः (१/१)। धातोः आदिः धात्वादिः तस्य धात्वादेः इति षष्ठीतत्पुरुषः समासः। सूत्रार्थो भवति - धातोः आदेः षकारस्य स्थाने सकारादेशः भवति। धातुपाठे येषां धातूनां आदिवर्णः षकारः अस्ति ते षोपदेशाः धातवः कथ्यन्ते।

उदाहरणम् - षिध गत्याम्।

सूत्रार्थसमन्वयः - षिध इति धातुपाठे पठितः धातुः। अतः उपदेशावस्थायां स तस्यादिः षकारः अस्ति। अतः स षोपदेशः। धात्वादेः षः सः इति प्रकृतसूत्रेण तस्य आदेः षकारस्य स्थाने सकारादेशः भवति। तेन सिध इति जायते।

[१३.१०] णो नः॥ (६.१.६३)

सूत्रार्थः - धात्वादेः णस्य नः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण नकारः विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। णः (६/१), नः (१/१)। धात्वादेः षः सः इति सूत्रात् धात्वादेः (६/१) इति पदमनुवर्तते। धातोः आदिः धात्वादिः तस्य धात्वादेः इति षष्ठीतत्पुरुषः समासः। सूत्रार्थो भवति - धातोः आदेः णकारस्य स्थाने नकारादेशः भवति। धातुपाठे येषां धातूनां आदिवर्णः णकारः अस्ति ते णोपदेशाः धातवः कथ्यन्ते।

उदाहरणम् - णम् - नम्, णीञ् - नी, णद – नद।

सूत्रार्थसमन्वयः - णम् इति धातुपाठे पठितः धातुः। अतः उपदेशावस्थायां तस्य आदिः णकारः अस्ति। अतः स णोपदेशः। णो नः इति प्रकृतसूत्रेण तस्य आदेः णकारस्य स्थाने नकारादेशः भवति। तेन नम् इति जायते। ततश्च लटि तिपि शपि नमति इत्यादिरूपाणि सिध्यन्ति।

णद अव्यक्ते शब्दे इति भ्वादिगणीयः धातुः। स च णोपदेशः। तस्य लटि रूपाणि सुसाध्यानि सन्ति। तानि रूपाणि तावत् - **नदति नदतः नदन्ति। नदसि नदथः नदथ। नदामि नदावः नदामः।**

सिध्-धातोः वर्तमाने लट् इति लटि तिपि शपि सिध् अ ति इति स्थितिः जायते। तदा - (पुगन्तलघूपधस्य च इति सूत्रे द्रष्टव्यम्।)

[१३.११] इदितो नुम् धातोः॥ (७.१.५८)

सूत्रार्थः - इदितो धातोः नुमागमः भवति।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण नुम् विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। इदितः नुम् धातोः इति सूत्रगतपदच्छेदः। इदितः (६/१), नुम् (१/१), धातोः (१/१)। 'इत्' इत् यस्य सः इदित्, तस्य इदितः इति बहुव्रीहिसमासः। अर्थात् यस्य धातोः ह्रस्वः इकारः इत्संज्ञकः अस्ति स धातुः इदित्। सूत्रार्थो भवति - इदितो धातोः नुमागमः भवति। नुम् मित् अस्ति। अतः मिदचोऽन्त्यात् परः इति परिभाषया अन्त्यात् अचः परः भवति।

उदाहरणम् - टु नदिँ समृद्धौ।

सूत्रार्थसमन्वयः - टु नदिँ इति धातुः धातुपाठे पठितः। तस्य टु इत्यस्य आदिर्ञिटुडवः इति सूत्रेण इत्संज्ञा भवति। इकारः अनुनासिकः। अतः उपदेशेऽजनुनासिक इत् इति सूत्रेण इत् इत्संज्ञकः भवति। अतः अयं धातुः इदित्। इदितो नुम् धातोः इति सूत्रेण तस्य नुम् भवति। मित्त्वात् मिदचोऽन्त्यात् परः इति परिभाषया मित् नकारः परः यः अकारः तस्मात् परः भवति। तेन नन् द् इति स्थितिः भवति। नश्चापदान्तस्य झलि इति सूत्रेण अस्य नकारस्य अनुस्वारः भवति। ततश्च अनुस्वारस्य ययि परसवर्णः इति सूत्रेण परसवर्णे कृते नन्द् इति लभ्यते। ततश्च वर्तमाने लट् इति लटि तिपि शपि नन्द् अ ति इति स्थिते वर्णमेलने **नन्दति** इति रूपं सिध्यति।

णद धातोः अन्येषु रूपेषु कोऽपि विशेषो नास्ति। तानि रूपाणि हि - **नन्दति नन्दतः नन्दन्ति। नन्दसि नन्दथः नन्दथ। नन्दामि नन्दावः नन्दामः।**

[१३.१२] पुगन्तलघूपधस्य च॥ (७.३.८६)

सूत्रार्थः - पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः सार्वधातुकार्धधातुकयोः प्रत्यययोः परयोः।

सूत्रव्याख्या - विधिसूत्रमिदम्। अनेन सूत्रेण गुणो विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। पुगन्तलघूपधस्य (६/१), च इत्यव्ययम्। मिदेर्गुणः इत्यस्मात् सूत्रात् गुणः इति प्रथान्तं पदमनुवर्तते। अङ्गस्य (६/१) इति अधिकृतमस्ति। सार्वधातुकार्धधातुकयोः (७/२) इति सूत्रमायाति। अर्ति-ह्री-व्ली-री-क्नूयी-क्ष्माय्यातां पुग्णौ इति सूत्रेण पुगागमो विधीयते। अयं पुक् अन्ते यस्य तत् पुगन्तम् अङ्गम् इति बहुव्रीहिसमासः। लघुः उपधा यस्य तद् लघूपधम् अङ्गम् इति बहुव्रीहिसमासः। पुगन्तं च लघूपधं चेति पुगन्तलघूपधम्, तस्य पुगन्तलघूपधस्य इति समाहारद्वन्द्वसमासः।

अस्मिन् सूत्रे कस्य स्थाने गुणः भविष्यति इति स्थानी साक्षात् नोक्तः। किन्च गुणः इति विधेयपरं गुणपदम् उच्चार्य गुणः विधीयते। अतः इको गुणवृद्धी इति परिभाषया इकः इति षष्ठ्यन्तं पदमत्रोपस्थाप्यते। इदं सूत्रम् अङ्गाधिकारे पठितम्। अङ्गसंज्ञा प्रत्यये परे सति एव फलति। अतः प्रत्यये

इति पदमाक्षिप्यते। तत्रापि सार्वधातुकार्धधातुकयोः इति सप्तमीद्विवचनम्। एतौ अपि प्रत्ययौ एव। अतः प्रत्यये इत्यस्य प्रत्यययोः इति सप्तमीद्विवचनं गृह्यते। तदा पदयोजना भवति - पुगन्तलघूपधस्य च अङ्गस्य इकः गुणः सार्वधातुकार्धधातुकयोः प्रत्यययोः इति।

ततश्च सूत्रार्थो भवति – सार्वधातुके आर्धधातुके च प्रत्यये परे पुगन्तस्य लघूपधस्य अङ्गस्य इकः स्थाने गुणः स्यात् इति।

उदाहरणम् - सेधति।

सूत्रार्थसमन्वयः - धात्वादेः षः सः इति पूर्वसूत्रोक्तप्रकारेण सिध्-धातोः वर्तमाने लट् इति लटि तिपि शपि सिध् अ ति इति स्थितिः जायते। शप् सार्वधातुकम् परे अस्ति तदा सिध् इति अङ्गम् अस्ति। तस्य इकारः लघुसंज्ञकः उपधासंज्ञकः च। अतः पुगन्तलघूपधस्य च इति प्रकृतसूत्रेण इकः इकारस्य स्थाने गुणे स्थानत आन्तर्याद् एकारे **सेधति** इति रूपं सिध्यति।

षिध गत्याम् इति भ्वादिगणीयः धातुः। अस्य रूपाणि एतावता उपात्तैः सूत्रैरेव भवन्ति। अतः तानि रूपाणि छात्रेण साधनीयानि। सिद्धानि रूपाणि अधः अग्रे दत्तानि सन्ति। - **सेधति सेधतः सेधन्ति। सेधसि सेधथः सेधथ। सेधामि सेधावः सेधामः।**

अधः केचिद् धातवः दीयन्ते। एतावता अतिक्रान्तानि कानिचन सूत्राणि प्रयुज्य तेषां रूपाणि कर्तुं शक्यानि। तानि रूपाणि अभ्यासाय छात्रेण साधनीयानि।

१) **पठ** व्यक्तायां वाचि - **पठति पठतः पठन्ति। पठसि पठथः पठथ। पठामि पठावः पठामः।**

२) **गद** व्यक्तायां वाचि - **गदति गदतः गदन्ति। गदसि गदथः गदथ। गदामि गदावः गदामः।**

३) **अर्च** पूजायाम्- **अर्चति अर्चतः अर्चन्ति। अर्चसि अर्चथः अर्चथ। अर्चामि अर्चावः अर्चामः।**

४) **व्रज** गतौ - **व्रजति व्रजतः व्रजन्ति। व्रजसि व्रजथः व्रजथ। व्रजामि व्रजावः व्रजामः।**

५) **कटेँ** वर्षावरणयोः- **कटति कटतः कटन्ति। कटसि कटथः कटथ। कटामि कटावः कटामः।**

६) **क्षि** क्षये - **क्षयति क्षयतः क्षयन्ति। क्षयसि क्षयथः क्षयथ। क्षयामि क्षयावः क्षयामः।**

७) **चितीँ** संज्ञाने - **चेतति चेततः चेतन्ति। चेतसि चेतथः चेतथ। चेतामि चेतावः चेतामः।**

८) **तप** सन्तापे - **तपति तपतः तपन्ति। तपसि तपथः तपथ। तपामि तपावः तपामः।**

९) **शुच** शोके - **शोचति शोचतः शोचन्ति। शोचसि शोचथः शोचथ। शोचामि शोचावः शोचामः।**

पाठगतप्रश्नाः-७

उपरितनपाठम् अवलम्ब्य अत्र केचित् लघूत्तरीयाः प्रश्नाः दीयन्ते। एतेषाम् उत्तराणि लिखित्वा अन्ते दत्तैः उत्तरैः मेलयत।

४४. षोपदेशधातुः कः। उदारहणं देयम्।

४५. णोपदेशधातुः कः। उदारहणं देयम्।

४६. उपदेशे धात्वादेः षस्य किं भवति, केन च सूत्रेण।

४७. उपदेशे धात्वादेः णस्य किं भवति, केन च सूत्रेण।

४८. उपदेशे यदि धातुः इदित् अस्ति तर्हि किं भवति, केन च सूत्रेण।

४९. सेधति इति रूपे सिध्-धातोः इकारस्य एकारः केन सूत्रेण।

५०. सार्वधातुके परे लघूपधस्य अङ्गस्य इकः गुणः केन सूत्रेण।

५१. नन्दति इत्यत्र नद् धातुः उपदशे कीदृशः।

५२. कस्मिन् परे लघूपधस्य अङ्गस्य इकः गुणः भवति।

१) सार्वधातुके २) आर्धधातुके ३) सार्वधातुके आर्धधातुके च ४) इडागमे

५३. पुगन्तलघूपधस्य च इत्यस्य उदाहरणम् किम्।

१) भवति २) सेधति ३) क्षयति ४) अक्षैषीत्

५४. नन्दति इत्यत्र नद् धातोः अर्थः कः।

१) वृद्धिः २) समृद्धिः ३) सत्ता ४) अव्यक्तः शब्दः

पाठसारः

भूवादयो धातव इति सूत्रेण धातुपाठे पठितानां शब्दस्वरूपाणां धातुसंज्ञा भवति। धातवः क्रियावाचकाः भवन्ति। धातोः अर्थः फलं व्यापारश्च। धातोः व्यापारः विभिन्नेषु कालेषु वर्तते इति द्योतनाय धातोः परं विभिन्नाः लकाराः प्रयुज्यन्ते। एते लकाराः प्राधान्येन लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रेण विधीयन्ते। तेषां लकाराणां यथा वर्तमानादिकालाः अर्थाः तथा कर्ता कर्म भावः एते अपि अर्थाः सन्ति। अत्र भावशब्दस्यार्थः क्रिया एव। सकर्मकधातोः परं कर्तरि कर्मणि च लकारः भवति। अकर्मकधातोः परं कर्तरि भावे च लकारः भवति। कस्माद् धातोः लकारः कदा कर्तरि कदा कर्मणि इत्यादि विवक्षाधीनम्।

धात्वर्थः व्यापारः वर्तमाने काले वर्तते इति द्योतनाय वर्तमाने लट् इति सूत्रेण लट् विधीयते। लस्य स्थाने तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातञ्झ-थासाथांध्वम्-इड्वहिमहिङ् इति सूत्रेण अष्टादश आदेशाः विधीयन्ते। एते लादेशाः इति कथ्यते। ततश्च लः परस्मैपदम् इति तङानावात्मनेपदम् इति सूत्रद्वयस्य पर्यालोचनया इदं लभ्यते यत् तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस् परस्मैपदसंज्ञकाः सन्ति। तङ् प्रत्याहारः शानच्-कानचौ च आत्मनेपदसंज्ञाः भवन्ति।

उपदेशे यस्य धातोः अनुदात्ताच् इत् अस्ति, यस्य धातोः ङकारः इत् तादृशात् धातोः अनुदात्तङित आत्मनेपदम् इति सूत्रेण आत्मनेपदसंज्ञकाः प्रत्ययाः विधीयन्ते। उपदेशे यस्य धातोः स्वरिताच् इत् अस्ति, यस्य धातोः ञकारः इत् अस्ति, अपि च तद्धातोः क्रियाफलं कर्तारम् गच्छति इति ईदृशाद् धातोः आत्मनेपदविधानम् स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रेण क्रियते।

वाक्ये प्रयुक्तस्याप्रयुक्तस्य वा युष्मदः वाच्यं कारकम्, एवञ्च धातोः परं विहितस्य लकारस्य वाच्यं कारकं यदि समानं स्यात् तर्हि धातोः परं मध्यमसंज्ञकः प्रत्ययः भवति "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" इति सूत्रेण। अस्मद् लस्य समानाधिकरणः अस्ति चेत् धातोः परम् उत्तमसंज्ञकः प्रत्ययः अस्मद्युत्तम इति सूत्रेण विधीयते। यत्र एकस्मिन् वाक्ये युष्मद्-लकारयोः सामानाधिकरण्यम् एवञ्च अस्मद्-लकारयोः सामानाधिकरण्यम् इति एतद्वयमपि नास्ति चेत् धातोः परम् प्रथमसंज्ञकः प्रत्ययः शेषे प्रथमः इति सूत्रेण विधीयते।

धात्वधिकारोक्तः तिङ् शिच्च सार्वधातुकसंज्ञकः तिङ् शित् सार्वधातुकम् इति सूत्रेण भवति। तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः आर्धधातुकं शेषः इति सूत्रेण आर्धधातुकसंज्ञां लभते। किञ्च लिटः स्थाने विहितः तिङ् लिट् च इति सूत्रेण आर्धधातुकसंज्ञकः भवति। एवञ्च आशीर्वादार्थे विहितस्य लिङः स्थाने विहितः तिङ् लिङाशिषि इति सूत्रेण आर्धधातुकसंज्ञकः भवति।

धातुतः कर्त्रर्थं सार्वधातुकं परम् अस्ति चेत् कर्तरि शप् इति सूत्रेण धातोः परं शप् विधीयते। यदि सार्वधातुके आर्धधातुके वा परे इगन्तम् अङ्गं यदि स्यात् तर्हि "सार्वधातुकार्धधातुकयोः" इति सूत्रेण इकः गुणः विधीयते। इत्थं भू अ ति इति स्थिते भू इत्यस्य ऊकारस्य ओकारः भवति। ओकारस्यापि अवादेशे भवति इति रूपं सिध्यति।

झि इति प्रथमबहुचनस्य प्रत्ययः। तस्य झकारस्य स्थाने अन्त् इत्यादेशः झोऽन्तः इति सूत्रेण भवति। ततश्च भवन्ति इति रूपं सिध्यति। यञादौ सार्वधातुके परे अदन्तस्य अङ्गस्य स्थाने दीर्घः अतो दीर्घो यञि इति सूत्रेण विधीयते।

पाणिनिना धातुपाठे केचिद् धातवः णादित्वेन षादित्वेन च उपदिष्टाः। तेषां णस्य नत्वं षस्य सत्वं च धात्वादेः षः सः, णो नः इति सूत्राभ्यां भवति।

यथा सार्वधातुके आर्धधातुके वा परे इगन्ताङ्गस्य गुणो भवति, तद्वत् यस्य अङ्गस्य उपधा लघ्वी अस्ति, तत्र इग्लक्षणगुणविधानाय पुगन्तलघूपदस्य चेति सूत्रे कृतं पाणिनिना।

एतावान् विषयोऽत्र उपन्यस्तोऽस्ति।

पाठान्तप्रश्नाः

१. लः कर्मणि च भावे चाकर्मकेभ्यः इति सूत्रं व्याख्यात।

२. धातोः सकर्मकत्वम् अकर्मकत्वं च सोदाहरणं प्रतिपादयत।

३. लकारान् परिचाययत।

४. वर्तमाने लट् इति सूत्रं व्याख्यात।

५. कालम् आश्रित्य लघुनिबन्धं रचयत।

६. लः परस्मैपदम् इति सूत्रं व्याख्यात।

७. तङानावात्मनेपदम् इति सूत्रं व्याख्यात।

८. तङानावात्मनेपदम् इति सूत्रस्थेन आन इत्यनेन चानशः ग्रहणं कुतो न।

९. अनुदात्तङित आत्मनेपदम् इति सूत्रं व्याख्यात।

१०. स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रं व्याख्यात।

११. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इति सूत्रं व्याख्यात।

१२. अस्मद्युत्तमः इति सूत्रं व्याख्यात।

१३. शेषे प्रथमः इति सूत्रं व्याख्यात।

१४. प्रथममध्यमोत्तमानाम् प्रयोगम् अवलम्ब्य प्रबन्धं लिखत।

१५. धातोः लस्य स्थाने तिपः विधानं यावत् कथं सूत्राणि व्यस्थापयन्ति इति विशदीकुरुत।

१६. तिङ् शित् सार्वधातुकम् इति सूत्रं व्याख्यात।

१७. आर्धधातुकं शेषः इति सूत्रं व्याख्यात।

१८. कस्य सार्वधातुकसंज्ञा कस्य वा आर्धधातुकसंज्ञा इति सारं संगृह्णीत।

१९. सार्वधातुकार्धधातुकयोः इति सूत्रं व्याख्यात।

२०. अतो दीर्घो यञि इति सूत्रं व्याख्यात।

२१. पुगन्तलघूपधस्य च इति सूत्रं व्याख्यात।

२२. एतानि रूपाणि ससूत्रं साधयत। - भवति, भवन्ति, भवामि, भवामः।

२३. ससूत्रं रूपाणि साधयत – नन्दति, सेधति, नन्दन्ति, सेधामि।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि- १

१. लादेशाः सकर्मकधातुभ्यः कर्मणि कर्तरि च भवन्तीति प्रथमवाक्यम्। लादेशाः अकर्मकेभ्यः धातुभ्यः भावे कर्तरि च विधीयन्ते द्वितीयं वाक्यम्।

२. यस्य धातोः अर्थः फलम् एकस्मिन् कारके वर्तते, व्यापारः अपरस्मिन् कारके वर्तते स धातुः सकर्मकः कथ्यते।

३. यस्य धातोः फलम् यस्मिन् कारके वर्तते, व्यापारः अपि तस्मिन्नेव कारके वर्तते स धातुः अकर्मकः कथ्यते।

४. दश।

५. षट्।

६. चत्वारः।

७. लेट्।

८. यस्य धातोः अर्थः व्यापारः अर्थात् क्रिया वर्तमानकाले वर्तते स धातुः वर्तमानक्रियावृत्तिः कथ्यते। वर्तमाने (काले) क्रियायाः वृत्तिः यस्य स वर्तमानक्रियावृत्तिः धातुः।

९. भू।

१०. लट्। वर्तमाने लट्।

उत्तराणि- २

११. तिप्-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आताम्-झ-थास्-आथाम्-ध्वम्-इट्-वहि-महिङ् इति एते अष्टादश लादेशाः।

१२. तिप् तस् झि सिप् थस् थ मिप् वस् मस् इति एतेषां परस्मैपदसंज्ञा।

१३. त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् इति एवञ्च शानच् कानच् इति एतेषाम् आत्मनेपदसंज्ञा।

१४. लः परस्मैपदम्।

१५. तङानावात्मनेपदम्।

१६. यदा अनुबन्धरहितस्य उच्चारणं क्रियते तदा तेन अनुबन्धसहितस्य ग्रहणं कर्तव्यमिति निरनुबन्धकग्रहणे सानुबन्धकस्य इति परिभाषार्थः।

उत्तराणि- ३

१७. आत्मनेपदसंज्ञकः।

१८. आत्मनेपदसंज्ञकः।

१९. धातुनिष्ठानि।

२०. द्वन्द्वसमासस्य आदौ मध्ये अन्ते वा विद्यमानम् द्वन्द्वसमासस्य अनङ्गभूतम् पदम् द्वन्द्वसमासे विद्यमानैः पदैः प्रत्येकम् अभिसम्बध्यते, अन्वेति इति।

२१. लस्य।

२२. भ्वादिप्रकरणे आलोचितानि आत्मनेपदविधानस्य कानिचन निमित्तानि - उपदेशे यस्य धातोः अनुदात्ताच् इत् अस्ति, यस्य धातोः ङकारः इत् अस्ति द्वे निमित्ते। एवञ्च उपदेशे यस्य धातोः स्वरिताच् इत् अस्ति, यस्य धातोः ञकारः इत् अस्ति, अपि च तद्धातोः क्रियाफलं कर्तारम् गच्छति इत्यपि द्वे निमित्ते आत्मनेपदविधानस्य।

२३. ञितो धातोः कर्तृगामिनि क्रियाफले आत्मनेपदं विधीयते।

२४. एधँ वृद्धौ। कमुँ कान्तौ।

२५. आत्मनेपदनिमित्तहीनः धातुः हि शेषपदार्थः।

२६. तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः।

२७. तान्येकवचनद्विवचनबहुवचनान्येकशः।

उत्तराणि- ४

२८. वाक्ये युष्मद् लस्य समानाधिकरणः अस्ति चेत् मध्यमः विधीयते।

२९. वाक्ये अस्मद् लस्य समानाधिकरणः अस्ति चेत् उत्तमः विधीयते।

३०. वाक्ये मध्यमोत्तमयोः अविषये प्रथमः विधीयते।

३१. वाच्यम्, अर्थः, अभिधेयः।

३२. युष्मद्-लकारयोः सामानाधिकरण्यं चेत् धातोः मध्यमो विधेयः। अस्मद्-लकारयोः सामानाधिकरण्यं चेत् धातोः उत्तमो विधेयः इति उक्ताद् एतद्द्वयाद् अन्यः शेषः। सामानाधिकरण्यद्वयं वाक्ये नास्ति चेत् शेषः अस्ति। एवञ्च तदा धातोः प्रथमसंज्ञकः विधेयः।

उत्तराणि- ५

३३. धात्वधिकारोक्तः तिङ् शित् च सार्वधातुकसंज्ञः।

३४. तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः, लिङादेशः तिङ्, आशिषि लिङादेशः तिङ् च आर्धधातुकसंज्ञकाः भवन्ति।

३५. तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्ययः शेषः।

३६. कोऽपि लकारः सार्वधातुकसंज्ञकः नास्ति, तिङ्भिन्नत्वात् शिद्भिन्नत्वाच्च।

३७. लिङादेशः तिङ्, आशिषि लिङादेशः तिङ् च आर्धधातुकसंज्ञकः भवतः।

३८. आर्धधातुकम्।

३९. लुटि लृटि लुङि लृङि च धातु-लकारयोः मध्ये तास् स्य च्लि स्य एते विधीयन्ते। ते धातोः विहिताः तिङ्भिन्नाः, शिद्भिन्नाः च सन्ति। अतः आर्धधातुकसंज्ञकाः सन्ति।

उत्तराणि- ५

४०. कर्त्रर्थे सार्वधातुके परे धातोः शप् भवति।

४१. सार्वधातुकार्धधातुकयोः इति सूत्रेण।

४२. प्रत्ययावयवस्य झकारस्य स्थाने अन्त् इत्यादेशः स्यादिति झोऽन्तः इति सूत्रस्यार्थः।

४३. भवसि।

४४. उपदेशे यस्य धातोः आदिः षकारः भवति स षोपदेशधातुः। यथा षिध।

४५. उपदेशे यस्य धातोः आदिः णकारः भवति स णोपदेशधातुः। यथा णीञ्।

४६. उपदेशे धात्वादेः षस्य सकारः भवति, धात्वादेः षः सः इति सूत्रेण।

४७. उपदेशे धात्वादेः णस्य नकारः भवति, णो नः इति सूत्रेण।

४८. उपदेशे यदि धातुः इदित् अस्ति तर्हि इदितो नुम् धातोः इति सूत्रेण तस्य नुमागमः भवति।

४९. पुगन्तलघूपधस्य च।

५०. पुगन्तलघूपधस्य च।

५१. नन्दति इत्यत्र नद् धातुः उपदशे टुनदि इतीदृशः।

५२. ३

५३. २

५४. २

॥इति त्रयोदशः पाठः ॥